M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 1007.

Title: Ghaslokamith Com.

1007

:	:	Ekaślokа with Com.	: Title
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1007 :	:		: Remarks

श्रीगणेशायनमः विवाहैकध्याताभवतिविभवासक्तिरमराधिपश्री
दाहंतानिधनमपिचाहंत्यतितरां अतःसोसौविद्वांजननवनवृत्तिंसुविष
मांपरंपश्यन्नास्तेगुरुनरमुदारंजनमिमं १ कश्चनप्रवृत्तिमार्गेणनाना
विधसंकटपरिप्लवत्रस्तांतःकरणःनिवृत्तावेवसुखंप्रतर्क्यप्रवृत्तस्य
दुःखावस्थांश्लेषेणद्योतयन्निवृत्तस्यसुखातिशयावस्थामाह विवाहेति
विभवासक्तिःविगताभवासक्तिःसंसाराभिनिवेशोयस्मात्समुमुक्षुरि
त्यर्थःविवाहैकध्याताविःपक्षीगरुडःवाहोयानंयस्यतस्यविष्णोरेवए
कस्यअद्वितीयस्यध्याताध्याननिष्ठोभवतीत्यर्थः यद्वाशास्त्रनिषिद्धत्वा
म द्विरुद्धोवाहोवृषभाख्योयस्यशिवःयद्वाविपरीतःलघुत्वगमनानैपुण्या
दिभिर्वाहनलक्षणनिकृष्टःवाहोमूषकोयस्यसहेरंबःयद्वाविषमाःसप्तवा
हाअश्वायस्यसआदित्यः यद्वाबलातिशयाद्विशिष्टोविलक्षणोवाके
सरीवाहोयस्याःसाउमाभगवतीतदेकध्याता एवंचसंसारसंत्रस्तः

एकोहंपंचधाजातइत्यादिवचनदर्शितपंचविधान्यतमसगुणब्रह्मध्या
नानंदनिष्ठोभवतीति अधिकारतारतम्येनतस्यनिर्गुणब्रह्मानंदाति
शयावस्थामपिश्लेषेणाह तथाहि वीनांपक्षितुल्यानांजीवानामाश्रयः वि
शिष्टोमुख्यआश्रयइतिवातस्यैवस्वरूपपंचातीतस्य ब्रह्मणः ध्यानंनि
र्विषयकस्वरमवृत्तिविषयीकरणंतन्निष्ठोभवतीतिनिवृत्तपक्षेविवाह
शब्देनतन्मूलकः प्रवृत्तिमार्गः तदेकाभिनिवेशवान्विभवेऐश्वर्येआसक्ति न
र्यस्यतथाविधोभवति अपिचेतिविवक्षितांतरसमुच्चये अमराधिपस्येंद्र
स्यश्रीदस्यकुबेरस्यचाहंतामादृशऐश्वर्यैवान्निधिपातिस्तुकोपिनास्मी स्त्री
त्याकारकोहंकारः तस्यनिधनंत्याजनंअतितरामर्हतीति ऐंद्रादिसुखा
धिकब्रह्मानंदभोगानिरूपिततदुपादानकोत्कर्षाधिष्ठानत्वात् वराक्र
तसकलसिद्धिलाभ्स अन्यत्रतु अमराअविनाशिनीदुर्वारेतियावत्
आधिपश्रीः अतिशयितमानसव्यथासंपत् तस्यादाहंतदुपयुक्तानि

नानिक्षेत्रादीनिचधनंचकनकादि अर्हतीति अतोब्रह्मानंदाः
पा विभ्रांतः निजैश्वर्यंतुच्छीकृतेंद्रादिविभवत्वाच्च सोसौनिवृत्तः
प्रारब्धवशात्संसारेवर्त्तमानः गुरुतरयानिरुपाधिकत्वादपरिछि
न्नयामुदाब्रह्मानंदेनउपलक्षितः इमंस्वपरदेवमनुष्यातिर्यक्
स्थावरसाधारणंजनं परंकेवलं अरं अत्यर्थं सर्वत्रब्रह्माभेददर्श
नेन तत्रापिसमाधिनारंजनादितिभावः एतयोरभेदाद्गुरुतरमु
दाअलंपरिपूर्णइतिवासंबंधः पश्यन्नास्तेन पुनस्तत्राभिनिवि
शति आनंदातिशयाविर्भावेन तत्ररागद्वेषादिविरहातिभावः त
मपि त्रदोषज्ञान अनभिनिवेशेहेतुं हदंसंविशिनष्टि जननेतिजननं
जन्ममरणास्याद्युपलक्षणमेतत् तदुभयप्रवाहः वनमिवघोरः
तद्दत्तिं सुविषमांतमोव्याप्तत्यांकुशावहां विद्वान् अनुसंदधानः
इति अन्यत्तु अतः अवश्यपरिहार्यानिजाधिपरिहारानुकूलद्रव्य

श्लाभार्हत्वात् गुरुतरं निजगुण[illegible]शस्यात्कर्णादिभ्योपि महत्तरं
उदारं दानशूरं इमं कं[illegible]जनं [illegible]र पश्यन्नास्ति तेन पुनः किमपि
याचते दयौदार्यादिशालिना लोचनेन याचनाभावेपि स्वकार्यसिद्धे
रवश्यंभावित्वसंभावनादिति भावः ननु सन्तोपि बहवो धनिकाः सं
न्ति तैनेन सेव्याः इति शंकां परि[illegible]षु स्वां विशिनष्टि जनानां धनिका
नामपि कृपणानां नवनं प्रसाद[illegible]र्थं गुणवर्णनं तद्दानिं सुविषमां
अवमानने जोपहारादि दापग[illegible]त्वाद्दुःसहां विद्वान्मन्वान इति ७